**त्रिपञ्चाशत्** स्त्री त्र्यधिका पञ्चाशत् शा०त०। १त्र्यधिकपञ्चाशत्संख्यायां २तत्संख्यान्विते च। ततः पूरणे डट्। ३त्रिपञ्चाश तत्संख्यापूरणे त्रि०। पक्षे तमप्। त्रिपञ्चाशत्तम तस्मिन्नर्थे स्त्रियामुभयतो ङीप्। पक्षे त्रय आदेशे। त्रयःपञ्चाशदादयोऽपि उक्तार्थेषु।

**त्रिपटु** पु० काचे पारस्करनिघण्टुः।

**त्रिपताक** न०तिस्रः पताका इव यस्मिन्। पताकाकारवलित्रयान्विते १ललाटे, हारा०। मध्यमानामिकासङ्कोचेनावशिष्टाङ्गुलित्रयोन्नतत्वेन २त्रिपताकाकारिते करे पु०। "त्रिपताकं करं कृत्वा" इत्यादि सा० द० जनान्तिकशब्दनिर्वचने स्थितम्।

**त्रिपत्त्र** पु० त्रीणि त्रीणि पत्त्राणि प्रतिपत्त्रं यस्य सप्तच्छदवत् संख्याशब्दस्य वृत्तौ वीप्सार्थत्वम्। १बिल्ववृक्षे। तदीयपत्त्रेषु ब्रह्मादीनां स्थितिरुक्ता यथा "ऊर्द्ध्वपत्त्रं हरो ज्ञेयः पत्त्रं वामं विधिः स्वयम्। अहं दक्षिणपत्त्रं च त्रिपत्त्रदलमित्युत" वृहद्धर्म्मपु० ११ अ०। २पुत्त्रत्रययुक्ते त्रि०। समा० द्विगुः। ३पत्त्रत्रये न०।

**त्रिपत्त्रक** पु० त्रिपत्त्र+संज्ञायां कन्। १पलाशवृक्षे राजनि०। त्रयाणां पत्त्राणां समाहारः संज्ञायां कन्। "तुलसीकुन्दमालूरपत्त्राण्याङ्कस्त्रिपत्त्रकम्" देवीपु० उक्ते २तुलस्यादिपत्त्रत्रये न०।

**त्रिपथ** न० त्रयाणां पथां समाहारः अच् समा०। "पथः संख्याव्ययादेः" पा०क्लीवता। १मार्गाणां त्रितये। त्रयः पन्थानो यत्र अच् समा०। २त्रिमार्गयुक्ते (तेमाथा पथ) इति ख्याते स्थाने। "शून्यागारे श्मशाने वा निर्जने वा चतुष्पथे। बिल्वमावोद्यमस्थान्त्रिपथे वा भजेन्निशि। स भवेत् सर्वसिद्धीशः सर्ववेदविदां वरः" गुप्तसाधनतन्त्रम्।

**त्रिपथगा** स्त्री त्रयाणां पथां समाहारः अच् समा० तेन गच्छति गम—ड। गङ्गायाम्। त्रिमार्गगादयोऽप्यत्र "गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च। त्रीन् पथो भावयन्तीति तस्मात् त्रिपथगा स्मृता" रामा० बा० ४४ अ० "तराम सरितां श्रेष्ठां पुण्यां त्रिपथगां नदीम्" ४५ अ० "तन्वी शरत्त्रिपथगा पुलिने कपोलौ लोले दृशौ रुचिरचञ्चलखञ्जरीटौ" अमरुशत० "त्रिशिखां भ्रुकुटिञ्चास्य ददृशुर्दानवा रणे। ललाटस्थां त्रिकूटस्थां गङ्गां त्रिपथगामिव" हरिवं० २३५ अ०। "त्रीन् पथो हेतुना केन प्लावयेल्लोकपावनी। कथं गङ्गा त्रिपथगा विश्रुता सरिदुत्तमा। त्रिषु लोकेषु धर्मज्ञ! कर्मभिः कैः समन्विता" इत्युपक्रमे रामप्रश्ने विश्वामित्रस्योत्तरम् रामा० आ० ३६ अ० वाक्यं गङ्गाशब्दे दृश्यम्। णिनि ङीप्। त्रिपथ गामिन्यादयोऽप्यत्र।

**त्रिपदी** स्त्री त्रयः पादा अस्याः अन्त्यलोपः समा०ङीपि पद्भावः। १त्रिपादयुक्तायां स्त्रियां २गायत्रीच्छन्दसि च तस्या अष्टाक्षरपादत्वेन चतुर्विंशत्यक्षरायास्त्रिपादत्वात् तथात्वम्। यथा "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढ़मस्य पांसुरे" ऋ० १।२२।१७। "गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न हि पद्यसे" शत० ब्रा०१४।८। १५।१०। ३हस्तिनां पादबन्धनार्थरज्जुभेदे "नास्रसत्करिणां ग्रैवं त्रिपदीच्छेदिनामपि" रघुः ४अश्वाधारपात्रभेदे(तेपाइ)तन्त्रसा०५गोधापदीलतायां रत्नमा०। स्वार्थे क त्रिपदिकापि तत्रार्थे। भाषाकवितायां ६छन्दोभेदे तल्लक्षणं यथा "पज्झटिकान्ता यदि यमकान्ता द्वादशपरिगणितमात्रा किन्नरगीतिस्तदिति नीवितिः स्यादसमाक्षरगात्रा। (स्यःपदान्तः)। यैषा सङ्गीतके नित्यं निवीतिः किन्नराख्यिका। सैव स्यात् प्राकृते गाने त्रिपदीति परिश्रुता" इति काव्योदयः। "ढाश्चि" पा० टापि भत्वात् पद्भावः। त्रिपद ७गायत्र्यामृचि ऋग्भेदे स्त्री तच्छन्दस्के ८च्छन्दोमात्रे स्त्री "त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम्" मनुः। "द्विपदा याश्चतुष्पदास्त्रिपदा याश्च षट्पदाः" यजु० २३।३४। "त्रीणि पदानि पादा अस्याः "इतिपदशब्देन समासः" वेददी०। त्रिविक्रमे ८परमेश्वरे पु० त्रीणि पदानि विचक्रमे इति श्रुतेस्तथात्वम्। "त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत्" विष्णु स०। ९अरत्नेर्दशमभागरूपपदत्रययुक्ते प्रक्रमे पु० यथा। "पञ्चारत्निः पुरुषो दशपदो द्वादशाङ्गुलं पदं प्रक्रमस्त्रिपदः समविभक्तस्य" कात्या० श्रौ० १६।८।२१ "पञ्चारत्नयो यस्य सः पञ्चभिररत्निभिः पुरुषः दशभिः पदैः पुरुषो द्वादशभिरङ्गुलैः पदम् इत्येवमर्थो न भवति इतः प्रागरत्न्यादीनां लक्षणस्यानुक्तत्वेनासिद्धत्वात् अतश्चैवम् पुरुषस्य समविभक्तस्य यः पञ्चमो भागः सोऽरत्निः तस्य दशमो भागः पदम् पदस्य द्वादशो भागोऽङ्गुलम् त्रिभिः पदैरेकः प्रक्रमः" कर्कः।

**त्रिपरिक्रान्त** पु०त्रिषु इज्याध्ययन कर्मसु परिक्रान्तः चेष्टमानः। याजनाध्यापनप्रतिग्रहरूपजीविकात्रयनिरते ब्राह्मणे। "त्रैविद्यो ब्राह्मणो विद्वान् न चाध्ययनजीवकः। त्रि-